# 2023

## 5th Semester Examination

## SANSKRIT (Honours)

### Paper : C 12-T

### [Sanskrit Grammar]

### [CBCS]

Full Marks : 60 Time : Three Hours

*The figures in the margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable.*

1. निम्नलिखितेषु प्रश्नेषु दशप्रश्नाः संस्कृतेन देवनागर्य्या समाधेयाः — 2×10=20

(क) कति माहेश्वराणि सूत्राणि? कानि च तानि?

(ख) कति प्रकारकाणि सूत्राणि भवन्ति? कानि च तानि?

(ग) बाह्यप्रयत्नः कतिविधः के च ते?

(घ) एचामपि द्वादश भेदाः भवन्ति, कथम्?

(ङ) के अन्तःस्थवर्णाः?

(च) गुणसन्धिविधायकं सूत्रं किमस्ति? 'गणेशः' इत्यत्र कः सन्धिविच्छेदः?

P.T.O.

(छ) दीर्घसन्धि विधायकं सूत्रं किमस्ति ? दीर्घसन्धेः एकमुदाहरणं लिखतु।

(ज) 'पतञ्जलिः' इत्यत्र कः सन्धिविच्छेदः ?

(झ) श्चुत्वसन्धिविधायकं सूत्रं किमस्ति ?

(ञ) तवर्गस्य लकारे परे कः सन्धिः स्यात् ?

(ट) उक्ते कर्मणि का विभक्तिर्भवति ?

(ठ) वचनमात्रे प्रवर्तितायाः विभक्तेः कानि उदाहरणानि ?

(ड) 'सः माणवकं पन्थानं पृच्छति।' इत्यत्र गौणकर्मपदं किं विद्यते ?

(ढ) किं करणम् ? करणकारके का विभक्तिर्भवति ?

(ण) अधोलिखितस्य रेखाङ्कितपदद्वयस्य कारक-विभक्तिः निर्णेया —

(i) <u>तिलेषु</u> तैलमस्ति।

(ii) <u>अग्नये</u> स्वाहा।

2. निम्नलिखितेषु प्रश्नेषु ***चत्वारः*** प्रश्नाः समाधेयाः (एकस्योत्तरं संस्कृतभाषया देवनागर्य्या चावश्यं देयम्) : 5×4=20

(क) 'आदिरन्त्येन सहेता' इति सूत्रं व्याख्यायताम्।

(ख) अनुनासिकसञ्ज्ञाविधायकं सूत्रं सोदाहरणं व्याख्येयम्।

(ग) का नाम सन्धिरिति सम्यग्विविच्य तद्भेदाः सोदाहरणं प्रतिपादनीयाः।

(घ) 'स्थानेऽन्तरतमः' इति सूत्रं व्याख्यायताम्।

(ङ) कः प्रातिपदिकार्थः ? प्रातिपदिकार्थमात्रस्य उदाहरणं किम् ?

(च) 'आधारोऽधिकरणम्' इति सूत्रं व्याख्यायताम्।

3. अधोलिखितेषु ***प्रश्नद्वयस्योत्तरं*** प्रदेयम् : 10×2=20

(क) सवर्ण-संयोग-स्वरित-पद-संज्ञाविधायकानि सूत्राणि विलिख्य लघुसिद्धान्तकौमुद्याः मङ्गलाचरणश्लोकं व्याख्यायताम्।

(ख) वर्णानामुच्चारणस्थानानि लिखित्वा तेषामाभ्यन्तरप्रयत्नाः प्रदर्शनीयाः।

(ग) मद्ध्वरिः, पावकः, श्रीशः, गङ्गौघः, तट्टीका, तच्छिवः, शिवो बन्धः, हरी रम्यः-एषु चत्वारः सूत्रनिर्देशपूर्वकं साध्यन्ताम्।

(घ) बलिं भिक्षते वसुधाम्, गां दुग्धं दोग्धि
रामेण वाणेन हतो बाली, ग्रामादायाति,
मातुः स्मरति, मोक्षे इच्छास्ति, हे राम।

एतेषु पञ्चानां विशेषसूत्रनिर्देशपुरःसरं कारक-विभक्तिः निर्णेया।

---